श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री वराहपुराणे

# ॥ चित्रकूटस्थितश्रीरामस्तवनम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ चित्रकूटस्थितश्रीरामस्तवनम् ॥

नमामि रामं नरनाथमच्युतं
कविं पुराणं त्रिदशारिनाशनम्।
शिवस्वरूपं प्रभवं महेश्वरं
सदा प्रपन्नार्तिहरं धृतश्रियम्॥ 1 ॥

भवान् सदा देव समस्ततेजसां
करोषि तेजांसि समस्तरूपधृक्।
क्षितौ भवान् पञ्चगुणस्तथा जले
चतुष्प्रकारस्त्रिविधोऽथ तेजसि॥ 2 ॥

द्विधाऽथ वायौ वियति प्रतिष्ठितो
भवान् हरिः शब्दचरः पुमानसि।
भवाञ्छशी सूर्यहुताशनोऽसि
त्वयि प्रलीनं जगदेतदुच्यते॥ 3 ॥

भवत्प्रतिष्ठं रमते जगद्यतः
ततोऽसि रामेति जगत्प्रतिष्ठितः।
भवार्णवे दुःखतरोर्मिसङ्कुले
तथाक्षमीनग्रहनक्रभीषणे॥ 4 ॥

न मज्जति त्वत्स्मरणप्लवो नरः
स्मृतोऽसि रामेति तथा तपोवने।
वेदेषु नष्टेषु भवांस्तथा हरे
करोषि मात्स्यं वपुरात्मनः सदा॥ 5 ॥

युगक्षये रञ्जितसर्वदिङ्मुखे
भवांस्तथाग्निर्बहुरूपधृग्विभो।
कौर्मं तथा स्वं वपुरास्थितः सदा
युगे युगे माधव सिन्धुमन्थने॥ **6** ॥

न चान्यदस्तीति भवत्समं क्वचित्
जनार्दनाद्यत्प्रबभूव चोत्तमम्।
त्वया ततं विश्वमिदं महात्मन्
लोकाखिला वेद दिशश्च सर्वाः॥ **7** ॥

कथं त्वमाद्यं परमं तु धाम
विहाय चान्यं शरणं व्रजामि।
भवानेकः पूर्वमासीत्ततश्च
महानहं सलिलं वह्निरूपैः।
वायुस्तथा खं च मनोऽपि बुद्धिः
चेतो गुणास्त्वत्प्रभवं च सर्वम्॥ **8** ॥

त्वया ततं विश्वमिदं समस्तं
सनातनस्त्वं पुरुषो मतो मे।
समस्तविश्वेश्वर विश्वमूर्ते
सहस्रबाहो जय देवदेव॥ **9** ॥

नमोऽस्तु रामाय महानुभाव इति स्तुतो देववरः प्रसन्नः।
तदा तु राज्ञः सुप्रतीकस्य मूर्तिं सन्दर्शयामास ततोऽभ्युवाच॥ **10** ॥

॥ इति श्रीरामस्तवनं समाप्तम्॥